[redacted]

Subject: [redacted]

**समयः – 3 होराः** **पूर्णाङ्काः -80**

**सामान्यनिर्देशाः –**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
4. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**प्रश्नपत्रस्वरूपम् -**

| | | | |
|---|---|---|---|
| 'क' खण्डः | : | अपठितावबोधनम् | 10 अङ्काः |
| 'ख' खण्डः | : | रचनात्मककार्यम् | 15 अङ्काः |
| 'ग' खण्डः | : | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| 'घ' खण्डः | : | पठितावबोधनम् | 30 अङ्काः |

## 'क' खण्डः
## अपठितावबोधनम् (10 अङ्काः)

| | | |
|---|---|---|
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>पुरा अस्माकं देशे बहवः प्रसिद्धाः राजानः अभवन्। तेषु दुष्यन्तः नाम एकः नृपः आसीत्। तस्य भार्या शकुन्तला आश्रमे पुत्रम् अजनयत्। तस्य नाम भरतः आसीत्। भरतः शैशवास्थायाम् अपि आश्रमे सिंहशावकैः सह क्रीडति स्म। एकदा सः एकस्य सिंहशावकस्य मुखम् उदघाटयत् अवदत् च- 'जृम्भस्व सिंह! दन्तान् ते गणयिष्यामि।' सिंहशावकः अपि जानाति स्म यत् भरतः अपि मया सदृशः शिशुः अस्ति, मया सह च क्रीडति अतः सः भरताय नाक्रुध्यत् न च आक्राम्यत्। तत्र तापसीभ्यां निषिद्धः अपि भरतः कथयति स्म - नाहं सिंहात् बिभेमि। इत्थम् आसीत् सः निर्भयः वीरः भरतः। भरतस्य अभिधानेन एव अस्माकं देशस्य आर्यावर्तस्य नाम 'भारतम्' अभवत्। | 10 |
| | **अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) निर्भयः वीरः च कः आसीत्?<br>(ii) भरतः कैः सह क्रीडति स्म?<br>(iii) भरतस्य मातुः नाम किम् आसीत्? | 1x2=2 |
| | **आ. पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)**<br>(i) भरतः सिंहशावकं किम् अवदत्?<br>(ii) सिंहशावकः भरताय किमर्थं नाक्रुध्यत् न च आक्राम्यत्?<br>(iii) भरतः तापस्यौ किं कथयति स्म? | 2x2=4 |
| | **इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** | 1 |
| | **ई. यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)**<br>(i) 'इत्थम् आसीत् सः निर्भयः वीरः भरतः' अत्र किं क्रियापदम्?<br>(क) इत्थम् (ख) आसीत्<br>(ग) निर्भयः (घ) वीरः | 1x3=3 |

| | | | |
|---|---|---|---|
| | (ii) 'सदृशः' इति विशेषणपदस्य विशेष्यपदं किम्?<br>(क) नृपः (ख) वीरः<br>(ग) निर्भयः (घ) शिशुः<br>(iii) 'नृपाः' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?<br>(क) सिंहशावकः (ख) दन्तान्<br>(ग) राजानः (घ) प्रसिद्धाः | | |

(iv) 'गणयिष्यामि' इति क्रियापदस्य कर्तृपदं किं भवेत्?

(क) अहम्　　　　(ख) ते

(ग) सः　　　　(घ) दन्तान्

## 'ख' खण्डः

## रचनात्मकं कार्यम् (15 अङ्काः)

**2. भवान् जयपुरवासी राजेन्द्रः अस्ति। स्वमित्रं मुकेशं स्वभगिन्याः विवाहे निमन्त्रयितुं लिखितं पत्रं मञ्जूषायाः पदैः पूरयित्वा पुनः लिखत-** **½x10=5**

जयपुरतः

दिनाङ्कः -----------

प्रियमित्र मुकेश!

सस्नेहं (i) ------------।

अत्र कुशलं तत्रास्तु। भवान् इदं (ii) --------------- अत्यधिकः प्रसन्नः भविष्यति यत् मम (iii) ------------------- दिव्यायाः विवाहः विजयनगरनिवासि-श्रीवेदप्रकाशस्य पुत्रेण (iv) ------------- सह दिसम्बर-मासस्य एकादशतिथौ निश्चितः जातः। (v) -------------- सायं सप्तवादने आगमिष्यति। अस्मिन् मङ्गलावसरे भवान् सपरिवारः सादरं निमन्त्रितः। भवता स्वपरिवारेण सह विवाहतः (vi) ---------- पूर्वमेव अत्र आगत्य व्यवस्थायां (vii) ----------- अपि करणीयम्। भवतः उपस्थितिः (viii) --------------- उत्साहं विश्वासं च वर्धिष्यते। इतोऽपि भवतः जयपुरदर्शनस्य इच्छासिद्धिः अपि (ix) ----------------। गृहे पितृभ्यां मम प्रणामाः।

भवतः (x) --------------

राजेन्द्रः

**मञ्जूषा**

| |
|---|
| भविष्यति, मम, नमः, वरयात्रा, राकेशेन, सहाय्यम्, भगिन्याः, अभिन्नहृदयः, त्रिदिनानि, ज्ञात्वा |

**3.** प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत – **1×5=5**



**मञ्जूषा –**

| क्रीडन्ति, उद्यानस्य, भ्रमन्ति, पुष्पाणि, वृक्षाः, बालाः, चित्रकार्यम्, हरीतिमा, दोलयतः |
|---|

**अथवा**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत - **1×5=5**

**"वायुप्रदूषणम्"**

**मञ्जूषा –**

| स्वास्थ्यम्, पर्यावरणस्य, रक्षकाः, उद्योगानाम्, प्राणवायुम्, वृक्षारोपणम्, उपायाः, निर्माणकार्यम्, सहायकाः, वाहनानां धूम्रः, श्वासरोगाः। |
|---|

**4.** अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत – (केवलं वाक्यपञ्चकम्) **1×5=5**

1. उसने संस्कृतपुस्तक पढ़ी।
   He read Sanskrit Book.
2. मेरे घर के पास विद्यालय है।
   The school is near my house.
3. बसन्त सभी ऋतुओं में श्रेष्ठ है।
   Spring is the best among all seasons.
4. बच्चों! तुम सब उधर मत जाओ।
   Children! do not go that side.

| | | |
|---|---|---|
| | 5. छात्र कक्षा में भोजन नहीं करेंगे।<br>Students will not eat in class.<br>6. शिवाजी शक्तिमान् राजा था।<br>Shivaji was a mighty king.<br>7. भारतीय संस्कृति विश्व में प्रसिद्ध है।<br>Indian culture is famous in the world. | |
| | | |
| | **'ग' खण्डः**<br>**अनुप्रयुक्तव्याकरणम् (25 अङ्काः)** | |
| **5.** | **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) सङ्कोचमञ्चति **सरः + त्वयि** दीनदीनो।<br>(ii) ते **चक्षुर्नामनी** मते।<br>(iii) सः कृच्छ्रेण भारम् **उत् + वहति**।<br>(iv) पाषाणी सभ्यता निसर्गे **स्यात्र** समाविष्टा।<br>(v) किं **नामधेयः + भवतोः** गुरुः? | 1×4=4 |
| | | |
| 6. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) सर्वथा समरूपः **कुटुम्बवृतान्तः**।<br>(क) कुटुम्बः वृतान्तः (ख) कुटुम्बाय वृतान्तः<br>(ग) कुटुम्बस्य वृतान्तः (घ) कुटुम्बम् वृतान्तम्<br>(ii) **समानं शीलं व्यसनं येषां तेषु** सख्यम्।<br>(क) समानशीलव्यसनेषु (ख) समानशीलव्यसनम्<br>(ग) समानशीलव्यसनानि (घ) समानशीलव्यसनेभ्यः<br>(iii) न हि **निर्मलं** जलम्।<br>(क) मलस्य योग्यम् (ख) मलस्य अभावः<br>(ग) मलं प्रति (घ) मलम् अनतिक्रम्य<br>(iv) **व्याघ्रचित्रकौ** नदीजलं पातुम् आगतौ।<br>(क) व्याघ्रौ चित्रकौ च (ख) व्याघ्रः च चित्रकौ च<br>(ग) व्याघ्रौ च चित्रकः च (घ) व्याघ्रः च चित्रकः च<br>(v) सः **वृषभं च वृषभं च** नीत्वा गृहमगात्।<br>(क) वृषभाः (ख) वृषभान्<br>(ग) वृषभौ (घ) वृषभाभ्याम् | 1×4=4 |

| | | |
|---|---|---|
| 7. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) किं **<u>कुपिता</u>** एवं भणति?<br>(क) कुपिता + टाप् (ख) कुपित + टाप्<br>(ग) कुपितः + ङीप् (घ) कुपित + इक्<br>(ii) **<u>बुद्धि + मतुप्</u>** सा भयात् विमुक्ता।<br>(क) बुद्धिवान् (ख) बुद्धिमानः<br>(ग) बुद्धिमान् (घ) बुद्धिमती<br>(iii) तदेव **<u>सम + त्व</u>** कथ्यते।<br>(क) समत्वम् (ख) समत्वः<br>(ग) समता (घ) समत्त्वम्<br>(iv) जनाः प्रातः **<u>दिन + ठक्</u>** समाचारपत्रं पठन्ति।<br>(क) दैनिकः (ख) दैनिकी<br>(ग) दैनिकम् (घ) दैनिकाः<br>(v) सम्पत्तौ विपत्तौ च महताम् **<u>एकरूपता</u>**।<br>(क) एकरूप+त्व (ख) एकरूप+तल्<br>(ग) एकरूपत+टाप् (घ) एकरूप+ता | 1x4=4 |
| 8. | **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत – (केवलं प्रश्नत्रयम्)**<br>(i) **मालिका** – प्रतिष्ठे! किं त्वं संस्कृतस्य विज्ञानप्रदर्शनीं द्रष्टुं .........?<br>(क) गम्यते (ख) गच्छति<br>(ग) गच्छसि (घ) गच्छामि<br>(ii) **प्रतिष्ठा** – न मालिके! ................. तत्र न गम्यते।<br>(क) मया (ख) अहम्<br>(ग) त्वया (घ) आवाम्<br>(iii) **मालिका** - अधुना त्वया गृहे किं ...........?<br>(क) क्रियन्ते (ख) करोषि<br>(ग) करोति (घ) क्रियते | 1x3=3 |

| | | |
|---|---|---|
| | (iv) **प्रतिष्ठा** – श्वः मम परीक्षा भविष्यति अतः मया अधुना ........... पठ्यन्ते।<br>(क) पुस्तकम् (ख) पुस्तकानि<br>(ग) पुस्तकैः (घ) पुस्तके | |
| 9. | **कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) मम माता प्रातः --------- 4:15 वादने उत्तिष्ठति।<br>(ii) सा----------- 5:00 वादने योगाभ्यासं करोति।<br>(iii) तदन्तरम् सा स्नात्वा ------------- 6:45 वादने भोजनं पचति।<br>(iv) भोजनं गृहीत्वा अहम् ------------- 7:30 वादने विद्यालयं गच्छामि।<br>(v) अहम् ----------- 2:00 वादने आगत्य पुनः भोजनं करोमि। | 1x4=4 |
| | | |
| 10. | **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नत्रयम्)**<br>(i) केचिद् अम्भोदाः ------- गर्जन्ति।<br>(ii) यदि अहं कृष्णवर्णः ------- त्वं किं गौराङ्गः?<br>(iii) अयं प्रवासः अतिदीर्घः दारुणः ----------।<br>(iv) भवान् --------- भयात् पलायितः?<br>**मञ्जूषा**<br>च, वृथा, कुतः, तर्हि | 1x3=3 |
| 11. | **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत – (केवलं प्रश्नत्रयम्)**<br>(i) <u>**त्वां**</u> पितुः नाम किम् अस्ति?<br>(क) त्वम् (ख) तव<br>(ग) त्वया (घ) त्वयि | 1x3=3 |

(ii) ते श्वः विद्यालयं **<u>गच्छन्ति</u>**।

(क) अगच्छन् (ख) गमिष्यति

(ग) गमिष्यन्ति (घ) अगच्छताम्

(iii) यत्रास्ते सा **<u>धूर्ताः</u>** तत्र गम्यताम्।

(क) धूर्ता (ख) धूर्तः

(ग) धूर्तौ (घ) धूर्ते

(iv) **<u>सः</u>** बुद्धिमती कानने एकं व्याघ्रं ददर्श।

(क) तत् (ख) ताः

(ग) ते (घ) सा

## 'घ' खण्डः

## पठितावबोधनम् (30 अङ्काः)

| | | |
|---|---|---|
| 12. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>कश्चित् कृषकः बलीवर्दाभ्याम् क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषभः नोत्थितः। भूमौ पतितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन्। सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत् –" अयि शुभे ! किमेवं रोदिषि? सा च "भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न?" इति प्रत्यवोचत्। | 5 |
| | **अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) कः क्षेत्रे अपतत्?<br>(ख) सुरभिः कासां माता आसीत्?<br>(ग) कृषकः कं बहुधा पीडयति स्म? | ½x2=1 |
| | **आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) सुरभिः किमर्थं रोदिति स्म?<br>(ख) पतितं वृषभम् उत्थापयितुं कः प्रायतत?<br>(ग) सुराधिपः काम् अपृच्छत्? | 1x2=2 |
| | **इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) 'मातुः सुरभेः नेत्राभ्याम् अश्रूणि आविरासन्' इत्यस्मिन् वाक्ये कर्तृपदं किम्?<br>(ख) 'कृषीवलः' इति पदस्य किं विशेषणपदं प्रयुक्तम्?<br>(ग) 'तीव्रगत्या' इत्यस्य किं पर्यायपदं प्रयुक्तम्? | 1x2=2 |
| 13. | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>**उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति बोधिताः।**<br>**अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः ॥** | 5 |
| | **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) कीदृशाः नागाः वहन्ति?<br>(ख) पशुना कीदृशः अर्थः गृह्यते?<br>(ग) परेङ्गितज्ञानफलाः काः भवन्ति? | ½x2=1 |

| | | |
|---|---|---|
| | **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) पण्डितः जनः किं करोति?<br>(ख) मतयः कीदृश्यः भवन्ति?<br>(ग) के के बोधिताः भारं वहन्ति?<br>**इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) 'नागाश्च वहन्ति बोधिताः' अस्मिन् वाक्ये क्रियापदं किम्?<br>(ख) 'गजाः' इत्यस्य किं पर्यायपदं प्रयुक्तम्?<br>(ग) 'पण्डितः' इत्यस्य विशेष्यपदं चित्वा लिखत। | 1×2=2<br><br><br><br>1×2=2 |
| | | |
| **14.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>(गजः तं वृक्षमेव स्वशुण्डेन आलोडयितुमिच्छति परं वानरस्तु कूर्दित्वा अन्यं वृक्षमारोहति। एवं गजं वृक्षात् वृक्षं प्रति धावन्तं दृष्ट्वा सिंहः अपि हसति वदति च।)<br>**सिंहः** - भो गज ! मामप्येवमेवातुदन् एते वानराः।<br>**वानरः** - एतस्मादेव तु कथयामि यदहमेव योग्यः वनराजपदाय येन विशालकायं पराक्रमिणं भयङ्करं चापि सिंहं गजं वा पराजेतुं समर्था अस्माकं जातिः। अतः वन्यजन्तूनां रक्षायै वयमेव क्षमाः। (एतत्सर्वं श्रुत्वा नदीमध्यस्थितः एकः बकः)<br>**बकः** - अरे! अरे! मां विहाय कथमन्यः कोऽपि राजा भवितुमर्हति। अहं तु शीतले जले बहुकालपर्यन्तम् अविचलः ध्यानमग्नः स्थितप्रज्ञ इव स्थित्वा सर्वेषां रक्षायाः उपायान् चिन्तयिष्यामि, योजनां निर्माय च स्व सभायां विविधपदमलङ्कुर्वाणैः जन्तुभिश्च मिलित्वा रक्षोपायान् क्रियान्वितान् कारयिष्यामि अतः अहमेव वनराजपदप्राप्तये योग्यः।<br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) स्थितप्रज्ञः इव कः स्थितः भवति?<br>(ख) वानरः बकः च कस्मै आत्मानं योग्यौ मन्येते?<br>(ग) सिंहं गजं वा पराजेतुं केषां जातिः आत्मानं समर्था मन्यते? | 5<br><br><br><br><br><br><br><br><br>½×2=1 |
| | **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) सिंहः किं दृष्ट्वा हसति?<br>(ख) वन्यजन्तूनां रक्षायै के आत्मानं क्षमाः मन्यन्ते?<br>(ग) बकः कथं रक्षोपायान् क्रियान्वितान् कारयिष्यति?<br>**इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) 'त्यक्त्वा' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम्?<br>(ख) 'मामप्येवमेवातुदन् एते वानराः' अस्मिन् वाक्ये क्रियापदं किम्?<br>(ग) 'शीतले' इत्यस्य विशेष्यपदं चित्वा लिखत। | 1×2=2<br><br><br><br>1×2=2 |

15. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्) — 1×4=4

(क) **कालायसचक्रं** सदा वक्रं भ्रमति।

(ख) सा **निजबुद्ध्या** भयाद् विमुक्ता।

(ग) **रामः** सवाष्पम् अवलोकयति।

(घ) करुणापरो गृही **तस्मै** आश्रयं प्रायच्छत्।

(ङ) **ललितलतानां** माला रमणीया।

16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत – 1×4=4

रे रे चातक ! सावधानमनसा मित्र ! क्षणं श्रूयता-
मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥

**अन्वयः –** रे रे मित्र चातक ! (i) .......................... क्षणं श्रूयताम्। गगने हि बहवः (ii) ................. सन्ति। सर्वे अपि एतादृशाः न (सन्ति)। केचिद् वृष्टिभिः (iii) ........... आर्द्रयन्ति, केचिद् वृथा गर्जन्ति, (त्वम्) यं यं पश्यसि तस्य तस्य पुरतः दीनं (iv) ........... मा ब्रूहि।

**मञ्जूषा-**

| अम्भोदाः, वसुधाम्, वचः, सावधानमनसा |
|---|

**अथवा**

मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत - 1×4=4

**विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।**
**अन्येषां वदने ये तु ते चक्षुर्नामनी मते॥**

**भावार्थः –** अस्य भावः अस्ति यत् अस्मिन् संसारे (i) ............ एव (ii) .............. मन्यन्ते यतोहि ते ज्ञानवन्तः भवन्ति ज्ञानं च मनुष्यस्य वास्तविकं (iii) .........अस्ति। अन्येषां जनानां (iv) ............ ये नेत्रे भवतः ते तु चक्षुर्नामनी भवतः। ज्ञानं विना ते अन्ध इव भवन्ति।

**मञ्जूषा**

| मुखे, बुद्धिमन्तः, नेत्रवन्तः, चक्षुः |
|---|

| | | |
|---|---|---|
| 17. | **अधोलिखित-कथांशं समुचित-क्रमेण लिखत –**<br>(क) सः पुत्रं द्रष्टुं बसयानं विहाय पदातिरेव प्राचलत्।<br>(ख) न्यायाधीशः तम् अतिथिं ससम्मानं मुक्तवान्।<br>(ग) तस्मिन् गृहे रात्रौ कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।<br>(घ) मार्गे रात्रौ करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।<br>(ङ) कश्चन निर्धनः जनः वित्तमुपार्जितवान्।<br>(च) चौरस्य पदध्वनिना अतिथिः प्रबुद्धः अभवत् तमन्वधावत् च।<br>(छ) न्यायाधीशेन पुनः तौ घटनायाः विषये वक्तुम् आदिष्टौ।<br>(ज) पठनकाले छात्रावासे निवसन् तस्य पुत्रः रुग्णः अभवत्। | **½×8=4** |
| | | |
| 18. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत- (केवलं प्रश्नत्रयम्)**<br>(i) तस्य **भार्या** बुद्धिमती पितुर्गृहं प्रति चलिता।<br>(क) पत्नी (ख) भगिनी<br>(ग) भ्राता (घ) भारः<br>(ii) मा **ब्रूहि** दीनं वचः।<br>(क) बाला (ख) बालः<br>(ग) वद (घ) वाहकः<br>(iii) एतेन आरक्षिणा **अध्वनि** यदुक्तं तद् वर्णयामि।<br>(क) धमनम् (ख) मार्गे<br>(ग) धनम् (घ) धारा<br>(iv) शतशकटीयानं धूमं **मुञ्चति**।<br>(क) धावति (ख) पिबति<br>(ग) चलति (घ) त्यजति | **1×3=3** |

**समयः होरात्रयम्** **अङ्कयोजना उत्तरसङ्केताश्च** **सम्पूर्णाङ्काः 80**

**अवधातव्यम् -**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्।
3. अनुच्छेदे श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

| | **खण्डः 'क' अपठितावबोधनम्** | |
|---|---|---|
| 1. | **गद्यांशः** | |
| | **अ एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** | 1×2=2 |
| | (i) भरतः | |
| | (ii) सिंहशावकैः | |
| | (iii) शकुन्तला | |
| | **आ पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)** | 2×2=4 |
| | (i) भरतः सिंहशावकम् अवदत् - 'जृम्भस्व सिंह! दन्तान् ते गणयिष्यामि इति। | |

| | | |
|---|---|---|
| | (ii) सिंहशावकः अपि जानाति स्म यत् भरतः अपि मया सदृशः शिशुः अस्ति, मया सह च क्रीडति अतः सः भरताय नाक्रुध्यत् न च आक्राम्यत्।<br>(iii) भरतः तापस्यौ कथयति स्म - नाहं सिंहात् बिभेमि इति।<br>इ अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत –<br>**वीरः भरतः , भरतेन भारतम् , भरतस्य निर्भयता/वीरता।**<br>छात्रस्य उत्तरं दृष्ट्वा छात्रहिताय समुचितः निर्णयः करणीयः।<br>ई यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम्)<br>(i) (ख) आसीत्<br>(ii) (घ) शिशुः<br>(iii) (ग) राजानः<br>(iv) (क) अहम् | 1<br><br>1x3=3 |
| | **खण्डः 'ख' रचनात्मकं कार्यम्** | |
| 2. | पत्रलेखनम्<br><br>जयपुरतः<br>दिनाङ्कः 07/07/2022<br><br>प्रियमित्र मुकेश!<br>सस्नेहं (i) **नमः**।<br>अत्र कुशलं तत्रास्तु। भवान् इदं (ii) **ज्ञात्वा** अत्यधिकः प्रसन्नः भविष्यति यत् मम (iii) **भगिन्याः** दिव्यायाः विवाहः विजयनगरनिवासि-श्रीवेदप्रकाशस्य पुत्रेण (iv) **राकेशेन** सह दिसम्बर-मासस्य एकादशतिथौ निश्चितः जातः। (v) **वरयात्रा** सायं सप्तवादने आगमिष्यति। अस्मिन् मङ्गलावसरे भवान् सपरिवारः सादरं निमन्त्रितः। भवता स्वपरिवारेण सह विवाहतः (vi) **त्रिदिनानि** पूर्वमेव अत्र आगत्य व्यवस्थायां (vii) **सहाय्यम्** अपि करणीयम्। भवतः उपस्थितिः (viii) **मम** उत्साहं विश्वासं च वर्धिष्यति। इतोऽपि भवतः जयपुरदर्शनस्य इच्छासिद्धिः अपि (ix) **भविष्यति**। गृहे पितृभ्यां मम प्रणामाः।<br>भवतः (x) **अभिन्नहृदयः**<br>राजेन्द्रः | ½x10=5 |
| | | |

| | | |
|---|---|---|
| 3. | **चित्रवर्णनम्**<br>अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। **अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति।** वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते।<br>**अथवा**<br>**अनुच्छेदलेखनम्**<br>अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति। अतः अङ्काः देयाः। अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः। | 1×5=5 |
| | | |
| 4. | **अनुवादः** **(केवलं वाक्यपञ्चकम्)**<br>(i) सः/सा संस्कृतपुस्तकम् अपठत्/पठितवान्/पठितवती।<br>(ii) मम गृहस्य समीपे विद्यालयः अस्ति।<br>(iii) वसन्तः सर्वेषु ऋतषु श्रेष्ठः अस्ति।<br>(iv) भो बालाः/बालकाः! यूयं तत्र मा गच्छत।<br>(v) छात्राः कक्षायां भोजनं न करिष्यन्ति।<br>(vi) शिवाजी शक्तिमान् राजा/नृपः आसीत्।<br>(vii) भारतीया संस्कृतिः विश्वे प्रसिद्धा अस्ति। | 1×5=5 |
| | | |
| | **खण्डः 'ग' अनुप्रयुक्तव्याकरणम्** | |
| 5. | **सन्धिः सन्धिच्छेदश्च (केवलं प्रश्नचतुष्टयम्)**<br>(i) सरस्वयि<br>(ii) चक्षुः+नामनी<br>(iii) उद्वहति<br>(iv) स्यात्+न<br>(v) नामधेयो भवतोः | 1×4=4 |

| | | |
|---|---|---|
| 6. | **समासः विग्रहः च (केवलं प्रश्नचतुष्टयम्)**<br>(i) (ग) कुटुम्बस्य वृतान्तः<br>(ii) (क) समानशीलव्यसनेषु<br>(iii) (ख) मलस्य अभावः<br>(iv) (घ) व्याघ्रः च चित्रकः च<br>(v) (ग) वृषभौ | **1×4=4** |
| | | |
| 7. | **प्रत्ययाः (केवलं प्रश्नचतुष्टयम्)**<br>(i) (ख) कुपित+टाप्<br>(ii) (घ) बुद्धिमती<br>(iii) (क) समत्वम्<br>(iv) (ग) दैनिकम्<br>(v) (ख) एकरूप+तल् | **1×4=4** |
| | | |
| 8. | **वाच्यम् (केवलं प्रश्नत्रयम्)**<br>(i) (ग) गच्छसि<br>(ii) (क) मया<br>(iii) (घ) क्रियते<br>(iv) (ख) पुस्तकानि | **1×3=3** |

| | | |
|---|---|---|
| | | |
| 9. | **समयः (केवलं प्रश्नचतुष्टयम्)**<br>(i) सपाद-चतुर्वादने<br>(ii) पञ्चवादने<br>(iii) पादोन-सप्तवादने<br>(iv) सार्ध-सप्तवादने<br>(v) द्विवादने | **1×4=4** |
| | | |
| 10 | **अव्ययपदानि (केवलं प्रश्नत्रयम्)**<br>(i) वृथा<br>(ii) तर्हि | **1×3=3** |

| | | |
|---|---|---|
| | (iii) च<br>(iv) कुतः | |
| | | |
| 11 | **अशुद्धसंशोधनम् (केवलं प्रश्नत्रयम्)**<br>(i) (ख) तव<br>(ii) (ग) गमिष्यन्ति<br>(iii) (क) धूर्ता<br>(iv) (घ) सा | 1x3=3 |
| | | |
| | **खण्डः 'घ' पठितावबोधनम्** | |
| 12. | **गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) वृषभः/ दुर्बलवृषभः<br>(ख) सर्वधेनूनाम्<br>(ग) वृषभम्/ दुर्बलवृषभम्<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) स्वपुत्रस्य (वृषभस्य) दैन्यं दृष्ट्वा सुरभिः रोदिति स्म।<br>(ख) क्रुद्धः कृषीवलः/कृषकः पतितं वृषभम् उत्थापयितुं प्रायतत।<br>(ग) सुराधिपः सुरभिम् अपृच्छत्।<br>**इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) अश्रूणि<br>(ख) क्रुद्धः<br>(ग) जवेन | 3<br>½x2=1<br><br>1x2=2<br><br>1x2=2 |
| | | |
| 13. | **पद्यांशः**<br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) बोधिताः<br>(ख) उदीरितः/उदीरितोऽर्थः<br>(ग) बुद्धयः | 3<br>½x2=1 |

| | | |
|---|---|---|
| | **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) पण्डितः जनः अनुक्तमपि ऊहति।<br>(ख) मतयः परेङ्गितज्ञानफलाः भवन्ति।<br>(ग) हयाः नागाः च बोधिताः भारं वहन्ति। / हयाः नागाश्च बोधिताः भारं वहन्ति।<br>**इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) वहन्ति<br>(ख) नागाः<br>(ग) जनः | 1x2=2<br><br><br>1x2=2 |
| | | |
| 14. | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) बकः<br>(ख) वनराजपदाय<br>(ग) वानराणाम्<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) सिंहः गजं वृक्षात् वृक्षं प्रति धावन्तं दृष्ट्वा हसति।<br>(ख) वन्यजन्तूनां रक्षायै वानराः आत्मानं क्षमाः मन्यन्ते।<br>(ग) बकः स्वसभायां विविधपदमलङ्कुर्वाणैः जन्तुभिश्च मिलित्वा रक्षोपायान् क्रियान्वितान् कारयिष्यति।<br>**इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) विहाय<br>(ख) अतुदन्<br>(ग) जले | 3<br>½x2=1<br><br><br><br>1x2=2<br><br><br><br><br>1x2=2 |
| 15. | **प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)**<br>(क) **किं** सदा वक्रं भ्रमति?<br>(ख) सा **कया** भयाद् विमुक्ता?<br>(ग) **कः** सवाष्पम् अवलोकयति?<br>(घ) करुणापरो गृही **कस्मै** आश्रयं प्रायच्छत्?<br>(ङ) **कासां** माला रमणीया? | 1x4=4 |
| | | |

| | | |
|---|---|---|
| 16 | **अन्वयः-**<br>रे रे मित्र चातक ! (i) **सावधानमनसा** क्षणं श्रूयताम्। गगने हि बहवः (ii) **अम्भोदाः** सन्ति। सर्वे अपि एतादृशाः न (सन्ति)। केचिद् वृष्टिभिः (iii) **वसुधाम्** आर्द्रयन्ति, केचिद् वृथा गर्जन्ति, (त्वम्) यं यं पश्यसि तस्य तस्य पुरतः दीनं (iv) **वचः** मा ब्रूहि।<br>**अथवा**<br>**भावार्थे रिक्तस्थानपूर्तिः**<br>अस्य भावः अस्ति यत् अस्मिन् संसारे (i) **बुद्धिमन्तः** एव (ii) **नेत्रवन्तः** मन्यन्ते यतोहि ते ज्ञानवन्तः भवन्ति ज्ञानं च मनुष्यस्य वास्तविकं (iii) **चक्षुः** अस्ति। अन्येषां जनानां (iv) **मुखे** ये नेत्रे भवतः ते तु चक्षुर्नामनी भवतः। ज्ञानं विना ते अन्ध इव भवन्ति। | 1x4=4<br><br>1x4=4 |
| | | |
| 17. | **कथा-क्रमानुसार-लेखनम् –**<br>(क) कश्चन निर्धनः जनः वित्तमुपार्जितवान्।<br>(ख) पठनकाले छात्रावासे निवसन् तस्य पुत्रः रुग्णः अभवत्।<br>(ग) सः पुत्रं द्रष्टुं बसयानं विहाय पदातिरेव प्राचलत्।<br>(घ) मार्गे रात्रौ करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।<br>(ङ) तस्मिन् गृहे रात्रौ कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।<br>(च) चौरस्य पदध्वनिना अतिथिः प्रबुद्धः अभवत् तमन्वधावत् च।<br>(छ) न्यायाधीशेन पुनः तौ घटनायाः विषये वक्तुम् आदिष्टौ।<br>(ज) न्यायाधीशः तम् अतिथिं ससम्मानं मुक्तवान्। | ½x8=4 |
| 18. | **प्रसङ्गानुकूलम् उचितार्थचयनम्   (केवलं प्रश्नत्रयम्)**<br>(i) (क) पत्नी<br>(ii) (ग) वद<br>(iii) (ख) मार्गे<br>(iv) (घ) त्यजति | 1x3=3 |